Shrimadpeddapuram Lakshmiyoganarasimhasvami Suprabhatam

# श्रीमद्पेद्दापुरं लक्ष्मीयोगनारसिंहस्वामि सुप्रभातम्

## Document Information

Text title : Peddapuram LakshmiyoganArasimhasvami Suprabhatam

File name : peddApuramlakShmIyoganArasiMhasvAmisuprabhAtam.itx

Category : vishhnu, koriDevishvanAthasharmA, suprabhAta

Location : doc_vishhnu

Author : koriDe vishvanAthasharmA, dharmapurI

Transliterated by : koriDe vishvanAthasharmA

Proofread by : koriDe vishvanAthasharmA

Acknowledge-Permission: Koride Vishwanatha Sharma

Latest update : February 19, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# श्रीमद्पेद्दापुरं लक्ष्मीयोगनारसिंहस्वामि सुप्रभातम्

ॐ गँ गणपतये नमः ॥

ॐ श्रीवागीश्वर्यै नमः ॥

ॐ श्रीलक्ष्मी समेत योगनारसिंहस्वामिने नमः ॥

श्री पेद्दापुरं लक्ष्मीयोगनारसिंहस्वामि सुप्रभातम्
कोरिडे विश्वनाथ शर्मा, संस्कृतोपन्यासकः ।

उत्तिष्ठोत्तिष्ठ लक्ष्मीश ! उत्तिष्ठ नरकेसरिन्! ।
उत्तिष्ठ जगतां नाथ ! उदयाद्रिं गतो रविः ॥ १॥

श्रीलक्ष्मि! माधवि ! रमे ! जगदेकमातः
क्षीराब्धिजे ! सुरनुते ! कमले ! मनोज्ञे ! ।
नारायणीन्दुसहजे ! परिरक्ष लोकान्
पेद्दापुरेशदयिते ! तव सुप्रभातम् ॥ २॥

हे वासुदेव ! पुरुषोत्तम ! नारसिंह !
लक्ष्मीश ! जगृहि परात्पर ! पद्मनाभ ! ।
रक्ष्या त्वया हि जगती न सदाऽन्यकैस्तु
पेद्दापुरेश ! नृहरे ! तव सुप्रभातम् ॥ ३॥

प्रह्लादरक्षक ! जनार्दन ! दैत्यनाश !
पेद्दापुराद्रिनिलयार्कसुधांशुनेत्र ! ।
त्वद्वीक्षणार्थमिहचेक्षति भक्तवृन्दं
पेद्दापुरेश ! नृहरे ! तव सुप्रभातम् ॥ ४॥

पेद्दापुरस्यनिकटे गिरिमाश्रितः सन्
भक्तान् सदा हि परिपालयसीश ! नित्यम् ।
त्वद्भक्तरक्षणकृते ननु ते हि निष्ठा
पेद्दापुरेश ! नृहरे ! तव सुप्रभातम् ॥ ५॥

भक्ताः प्रदक्षिणविधिं त्ववलम्म्य निष्ठाः
कुर्वन्तिचात्र शकटैस्तु मुहुर् भ्रमन्ति
यत्त्वंह्यभीष्ट फलमाशु ददासि नूनम्
पेद्दापुरेश ! नृहरे ! तव सुप्रभातम् ॥ ६॥

ब्रह्मादयः सुरवरा वरयोगिवृन्दाः
स्नातानुलिप्तकृतनिष्ठवरिष्ठभक्ताः ।
ध्यानैकचित्तवशगा स्तव द्रष्टुकामाः
पेद्दापुरेश ! नृहरे ! तव सुप्रभातम् ॥ ७॥

श्रीचान्द्रमानगणने शुभचैत्रमासे
एकादशी शुभदिने वरशुक्लपक्षे ।
कल्याणमीक्षितजनास्तव लब्धभागाः
पेद्दापुरेश ! नृहरे ! तव सुप्रभातम् ॥ ८॥

यो मातृदास्यमपहर्तुमयं द्विजेन्द्रः
जित्वा महेन्द्रमपि देव! सुधां निनाय ।
स त्वीक्षतेऽत्र तव वाहनवैनतेयः
पेद्दापुरेश ! नृहरे ! तव सुप्रभातम् ॥ ९॥

वृक्षाग्रभगनिवसेषु विहङ्गमाश्च
ते चैव दर्शनफलं ननु बोधयन्ति ।
तत्त्वं प्रवक्तुमयि ते प्रकृतिर्वरिष्ठा
पेद्दापुरेश ! नृहरे ! तव सुप्रभातम् ॥ १०॥

मुग्धेषु पद्मनिकरेषु निबद्धभृङ्गाः
अद्यैवभानुकिरणैस्तु विमुक्तका ये ।
गायन्ति तेऽत्र हि सुतुल्यविमुक्तसङ्गाः
पेद्दापुरेश ! नृहरे ! तव सुप्रभातम् ॥ ११॥

इन्द्वर्कनेत्र ! भवतः खलु सेवनेषु
इन्दुस्तु ते स्वसहजामकरोद्धि पत्नीम् ।
भानुः करैः स्वप्रथमैर् यजते पदौ ते
पेद्दापुरेश ! नृहरे ! तव सुप्रभातम् ॥ १२॥

अथ स्तोत्रम्

हृतपापचयास्तव मन्दिरगा
गतविष्णुपदास्तव भक्तवराः ।
जिततापसिकास्तव दासवरा
विजयी भव देव! नृसिंह विभो! ॥ १॥

तव वैरिरहो ! ननु दैत्यवरस्
तव लब्धवरो ननु दैत्यशिशुः ।
तव दातृवरो ननु दैत्यबलिर्
विजयी भव देव! नृसिंह विभो! ॥ २॥

ननु दैत्यवधे तव सिंहमुखम् ।
नुतपालकृते नृतनुस्तव भोः ।
अवनीमवनेह्यवतारितवान्
विजयी भव देव! नृसिंह विभो! ॥ ३॥

मृगराजमुखाञ्चितपुण्यतनो !
खगराजविराजितयानविभो
फणिराजविभूषितपीठहरे
विजयी भव देव! नृसिंह विभो! ॥ ४॥

! नृसिंह विभो!!!! नृसिंह विभो!

अथ प्रपत्तिः
प्रह्लादकस्य हि वचः परिरक्षणार्थं
स्तम्भोद्भवन् प्रकटिताद्भुतदर्शनोऽसि ।
भक्तानुरागमयि ते विशदीकृतं हि
पेद्दापुरेश ! चरणौ शरणं प्रपद्ये ॥ १॥

त्वं लोकसृष्टिकरणे ननु ब्रह्मरूपः
तल्लोकपालनकृते ननु  विष्णुरूपः
तज्जीर्णलोकविलयीकरणे च रुद्रः
पेद्दापुरेश ! चरणौ शरणं प्रपद्ये ॥ २॥

दासौ तवैव नितरां खलु भक्तिशून्यौ
भक्तावमानक्रियया गतदैत्यरूपौ ।
प्रह्लादकस्तु तव लब्धवरोऽर्भदैत्यः
पेद्दापुरेश ! चरणौ शरणं प्रपद्ये ॥ ३॥

शूरोऽस्म्यहन्त्विति सुगर्वितदुष्टदैत्यः
मृत्युं त्वया स्वनियतिं त्वनुलङ्घ्ययातः ।
दुष्टाय कल्पयसि भोः! स्ववचोऽनुनाशं
पेद्दापुरेश ! चरणौ शरणं प्रपद्ये ॥ ४॥

बालो धृवो ननु जितेन्द्रियतापसोऽसौ
यस्ते प्रसादमलभज्जगदुन्नतं हि ।
भक्तिस्त्वयीश! प्रमुखा न वयः प्रमाणं
पेद्दापुरेश ! चरणौ शरणं प्रपद्ये ॥ ५॥

अथ श्री मङ्गळाशासनम्
अकाराय ह्यनन्ताय अष्टैश्वर्यप्रदायिने ।
अदिमध्यान्तहीनाय नारसिंहाय मङ्गळम् ॥ १॥

इन्द्रादिभिः सुसेव्याय इन्दिरानन्ददायिने ।
ईप्सितार्थप्रदायास्मै नारसिंहाय मङ्गळम् ॥ २॥

उग्ररूपाय दैत्येभ्य उडूनाम्पतिचक्षुषे
ऊर्ध्वस्त्रोतस्वरूपाय नारसिंहाय मङ्गळम् ॥ ३॥

ऋग्वेदादिभिस्तुत्याय ऋद्धिबुद्धिप्रदायिने ।
ऋषिभिर् ध्यानगम्याय नारसिंहाय मङ्गळम् ॥ ४॥

एकरूपाय नित्याय एकस्मै विश्वचक्षुषे ।
एकान्तिजनरक्षाय नारसिंहाय मङ्गळम् ॥ ५॥

ऐहिकामुष्मिकं दात्रे ऐश्वर्यानन्ददायिने ।
ऐक्ष्वाकुकलरामाय नारसिंहाय मङ्गळम् ॥ ६॥

ओङ्कारनादरूपाय ओजसे सूर्यकोटिनाम् ।
ओषधीशसुनेत्राय  नारसिंहाय मङ्गळम् ॥ ७॥

औग्र्यदैत्यविनाशाय औदुम्बरप्रियात्मने
औषधायामयानां च नारसिंहाय मङ्गळम् ॥ ८॥

सिद्धसाध्यनुतायास्मै देवकोटिस्तुताय च
पेद्दापुराद्रिवासायनारसिंहाय मङ्गळम् ॥ ९॥

ब्रह्मादिभिः सुवन्द्याय भक्तैश्वर्यप्रदायिने ।
पेद्दापुराद्रिवासायनारसिंहाय मङ्गळम् ॥ १० ॥

फलश्रुति
यद् विश्वनाथकृतवाङ्मयसेवनं हि
पेद्दापुरेशनृहरेः शुभसुप्रभातम् ।
प्रातस्तु ये निलयमेत्य पठन्ति भक्त्या
ते नारसिंहसदनुग्रहपात्रतार्हाः ॥ १ ॥

मया हि कोरिडे कुलीन विश्वनाथशर्मणा
मुदा कृतं तु नारसिंहसुप्रभातसेवनम् ।
नरेन्द्रकण्ठराजितं सदा ह्यरिष्टनाशकं
भवेन्नृसिंहमोदकं प्रपाठकाय मोक्षदम् ॥ २ ॥

हरिः ॐ ।
स्वस्तिप्रजाभ्यः परिपालयन्तां
न्यायेन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं
लोकाः समस्ताः सुखिनो भवन्तु ॥

काले वर्षन्तु पर्जन्याः पृथिवी सस्यशालिनी
देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तुनिर्भयाः ।
अपुत्राः पुत्रिणः सन्तु पुत्रिणः सन्तु पौत्रिणः
अधनाः सधनाः सन्तु जीवन्तु शरदां शतम् ॥

कायेन वाचा मनसेन्द्रियैर्वा
बुध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत्तत् सकलं परस्मै
नारायणायेति समर्पयामि ॥

हरिः ओं तत्सत् परमेश्वरार्पणमस्तु ॥

Composed by Koride Vishwanatha Sharma, Dharmapuri, Telangana
Proofread by Koride Vishwanatha Sharma.

*Shrimadpeddapuram Lakshmiyoganarasimhasvami Suprabhatam*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*